अथ हैतुकपाषण्डसमयापाकृतिं प्रभुः ॥ द्वितीयस्य द्वितीयांघ्रौ क्रमात्तुषट्कद्वयेऽकरोत् ॥ निरीश्वरं सांख्यमतमादौ देवो निराकरोत् (॥ १ ॥) हीशोपसर्जनं कर्तृप्रधानमिति यन्मतं ॥ नये द्वितीये भगवान् सूत्रकृत्तन्निराकरोत् (॥ २ ॥) तृतीये तु निराचक्रे लोकायतमतं हरिः (॥ ३ ॥) जीवोपसर्जनं कर्तृप्रधानमिति यन्मतं ॥ तच्चतुर्थे निराचक्रे भगवांत्सूत्रकृन्नये (॥ ४ ॥) प्रधानगुणको जीवो मुख्यकर्तेति यन्मतं ॥ तत्पंचमें निराचक्रे सूत्रकृद्भगवान्नये ॥ ५ ॥ वैशेषिकमतं षष्ठे निराचक्रे नये हरिः (॥ ६ ॥) सप्तमे वैभाषिकस्य मतं सौत्रांतिकस्य च ॥ पाषण्डिनोऽणुनि-चयं वादिनोऽपाकरोद्धरिः (॥ ७ ॥) शून्यकर्तृत्ववादं तु निराचक्रेऽष्टमे नये (॥ ८ ॥) विज्ञानकारणमतं नवमेऽपाकरोद्धरिः ॥ ९ ॥ सर्व प्रकारोपगंतृमतं तु दशमे नये [॥*] निराचक्रे (॥ १० ॥) उपांत्ये तु मतं शैवादिकं नये ॥ ११ ॥ चरमे तु नये दोषविशेषानभिभाषितुं ॥ निराचक्रे शक्तिमतं भगवांत्सूत्रकृत्पुनः ॥ द्वितीयस्य द्वितीयांघ्रौ द्वादशेति नयाः स्मृताः ॥

३. ॥ श्रुत्यविरोधपादः ॥

अथ श्रुतिविरोधापाकृतिं पादे तृतीयके ॥ द्वितीयस्य मिथश्चक्रे हरिः प्रथमके नये ॥ सोत्पत्त्यनुत्पत्तिवचोविरोधाभावमब्रवीत् (॥१॥) वायुजन्य-

जनिश्रुत्योरविरोधं द्वितीयके ।। २ ।। ब्रह्मजन्यजनिश्रुत्योरविरोधं तदुत्तरे ॥ ३ ।। अविरोधं चतुर्थे तु तेजोजनकवाक्ययोः ।। ४ ।। पंचमेत्वाहाविरोधं नयेऽब्ज-नकवाक्ययोः ।। ५ ।। ता अन्नमभ्द्यः पृथिवीति गिरोरविरोधकं (या युक्ति-स्तद्विरोधस्याभावमाह चतुर्थके ।। ४ ।। प्रबला श्रुतिसिद्धत्वाद्विष्णुकर्तृत्व-बाधने ।) षष्ठे नयेऽवदद्विष्णुरुक्तैवं नयषट्कनः ।। ६ ।। अधिभूताधि दैवीयजन्मश्रुत्यविरोधकं ।। संहारकर्तृवचसोरविरोधं तु सप्तमे ।। ७ ।। प्राहाष्टमेऽधिभूतादिसंहारक्रमवाक्चये ।। ८ ।। विज्ञानमनसोश्चैव लयक्रम-गिरोर्मिथः । अविरोधं नये प्राह नवमे सूत्रकृत्प्रभुः ।। ९ ।। दशमे तु नये ब्रह्मलयालयगिरोर्मिथः ।। १० ।। अविरोधं जीवजन्माजन्मवाचोरथा-ब्रवीत् ।। ११ ।। परिमाणगिरोर्ईस्याविरोधं द्वादशे नये ।। १२ ।। आहैकरूपत्वानेकरूपत्वोक्त्योस्त्रयोदशे ।। १३ ।। जीवेशभेदाभेदोक्त्योरविरोधं चतुर्दशे ।। १४ ।। अथ ज्ञतदुपाध्योर्जन्यजन्युक्त्योः परस्परं । नये पंचदशे प्राह विरोधाभावमीश्वरः ऽऽ ।। १५ ।। ज्ञस्या नंदादिरूपत्व तदभाव-गिरोर्नये ।। षोडशे प्राह ।। १६ ।। कर्तृत्वाकर्तृत्वोक्त्योः शरीरिणः । प्राह सप्तदशे ।। १७ ।। ज्ञस्येशांशानंशता गिरोः ॥ अष्टादशे नये प्राह विरोधाभावमच्युतः ।। १८ ।। ज्ञस्येशप्रतिबिंबत्वाप्रतिबिंबत्ववाक्ययोः ॥ विरोधाभावमवदच्चरमे सूत्रकृन्नये ।। १९ ।। द्वितीयस्य तृतीयांघ्रौ नया एकोनविंशतिः ॥

४. ।। युक्त्युपेतश्रुत्यविरोधपादः ॥

श्रुतीनां न्याययुक्ताभिर्विरोधं श्रुतिभिर्मिथः।। अपाकृतो सूत्रकृता (करो-त्सूत्रकारः) द्वितीयस्य तु तुर्यके ।। सोत्पत्तिवाचोऽनुत्पत्ति वाचा ऽऽदाव वदन्नये । अविरोधमुपादानाभावयुक्त्या युजा हरिः ॥ मनोजन्माजन्मवा-चोरविरोधं द्वितीयके ॥ २ ॥ वाग्जन्माजन्मवचसोराविरोधं तृतीयके ॥ ३ ॥ प्राणसंख्यागिरोस्तुर्ये विरोधाभावमब्रवीत् ॥ ४ ॥ प्राणाणुत्वानणुत्वोक्त्यो-रविरोधं च पंचमे ॥ ५ ॥ षष्ठे मुख्यप्राण जन्माजन्मश्रुत्यविरोधकं ॥ ६ ॥

तत्स्वातंत्र्यास्वतंत्रत्वागिरोराहाऽविरोधकं ।। सप्तमे (॥ ७ ॥) श्रेष्ठतद्दासभाव वाचोरथाष्टमे ॥ आहाऽविरोधं (॥ ८ ॥) प्राणादेरणुतानणुता गिरोः ॥ श्रेष्ठस्य नवमे प्राहाऽविरोधं सूत्रकृन्नये (॥ ९ ॥) जीवेशकरणत्वोक्त्योर-विरोधं तदुत्तरे ॥ चक्षुरादेर्नये प्राह भगवांत्सूत्रकृत्प्रभुः (॥ १० ॥) इन्द्रि-यत्वानिन्द्रियत्ववचसोर्भारतीपतेः ॥ एकादशनये प्राहाऽविरोधं सूत्रकृत्प्रभुः ॥ ११ ॥ विरिंच विष्णुजन्यत्ववचसोर्नामरूपयोः ॥ प्राहाऽविरोधं भगवां त्सूत्रकृद् द्वादशे नये ॥ १२ ॥ आहाऽविरोधं चरमे एककारणवाक्ययोः (॥ १३ ॥) द्वितीयस्य तुरीयांघ्रौ नया एवं त्रयोदश ॥

॥ इति द्वितीयाध्यायः ॥

॥ **अथ तृतीयाध्यायः** ॥

॥ विरक्तिपादः ॥

विचार्य ब्रह्मशब्दार्थमध्यायद्वितयेन तु ॥ तृतीये त्वथजिज्ञासापदार्थः प्रविचार्यते ॥ विरक्तिभक्त्युपासाद्यरूपः पादेषु च क्रमात् ।। ज्ञानहेतूपासनांग भक्तिदार्ढ्यार्थमादितः ॥ पादे जीवस्य गत्यादि सूत्रकृत्संन्वरूरुपत् ॥ भूता वियोगं जीवस्य तत्राऽऽदाववदन्नये (॥ १ ॥) कृत्स्नभूतावियोगं तु तदुत्तर नयेऽवदत् (॥ २ ॥) प्रागुक्तभूतगमनं तृतीये समसीषधत् (॥ ३ ॥) उप-पत्त्या प्राणगतिमाक्षिप्याऽनंतरे नये ॥ असीषधत् (॥ ४ ॥) भूतगति-माक्षिप्य भगवान्नये । पंचमे साधयामास (॥ ५ ॥) षष्ठे भूतगतिं पुनः ॥ विशेषश्रुत्यभावेन त्वाक्षिप्य समसीषधत् (॥ ६ ॥) कर्मणो मुक्तिहेतुत्वं नेति प्राह च सप्तमे (॥ ७ ॥) अष्टमे निश्शेषनाशाभावमाह स कर्मणां ॥ भोगेन (॥ ८ ॥) नवमे स्वर्गादागतीरिति रीरिता (॥ ९ ॥) गतागतस्य दशमे हरिणा कर्मकार्यता (॥ १० ॥) गतागतं पापकृतामप्यस्तीत्युदितं ततः (॥ ११ ॥) द्वादशे नित्यनिरयप्राप्तिरुक्ता समर्थिता ॥ हरिद्विषा (॥१२॥)

माह दुःखरूपतां नरकस्य तु ॥ त्रयोदशे (॥ १३ ॥) स्वतंत्रत्व चिंतासाधन-मेव तु ॥ फलेनेत्यवदत्सूत्रकृन्नये तु चतुर्दशे (॥ १४ ॥) ततोऽधतमसस्या-तिदुःखमात्रत्वमाह सः (॥ १५ ॥) षोडशे धूमादिभावाभावमाह सकर्मणां (॥ १६ ॥) नये सप्तदशे गर्भवासादिप्राप्तिमाशु सः ॥ स्वर्गादवाग्गतस्याह (॥ १७ ॥) व्रीह्यादित्वं न कर्मिणः ॥ इत्याहाऽष्टादशनये (॥ १८ ॥) त्यक्त स्वर्गस्य कर्मिणः ॥ पितृप्रवेशस्तूपांत्ये साधितो हरिणा नये (॥ १९ ॥) योनिप्रवेशेनेहदेहावाप्तिमाह नये हरिः (॥ २० ॥) चरमे विंशति नयाः तृतीयाद्य इतीरिताः ॥

तृतीयस्य द्वितीयांघ्रौ विष्णुमाहात्म्यमीरितं ॥ भक्त्युत्पत्त्यर्थमस्यादौ स्वप्नस्रष्टृत्वमीरितं (॥१॥) तत्तिरोधायकत्वं तु द्वितीयेऽभिहितं हरेः (॥२॥) जाग्रत्प्रवर्तकत्वं तु तृतीयेऽभिहितं नये ॥ ३ ॥ तुर्येऽधिकरणे तस्य मुक्तप्राप्यत्वमीरितं ॥ ४ ॥ पंचमेऽभिहितं सुप्तबोधकत्वं हरेर्नये (॥ ५ ॥) षष्ठे सार्वजनीनानामवस्थानां तु सर्वशः (॥ ६ ॥) प्रवर्तकत्वमीशस्य नये सूत्रकृतेरितं ॥ अर्धप्राप्यत्वमुक्तं स होमावस्थाने सप्तमे ॥ जीवेनेशस्या (॥ ७ ॥) ष्टमे तु निर्दोषगुणपूर्णतां ॥ अभिन्नत्वं च सर्वत्र हरेः सूत्र कृदब्रवीत् (॥ ८ ॥) तस्या प्राकृतदेहत्वं जगाद नवमे नये (॥ ९ ॥) भेदाभेदाभावमाह दशमे जंतुना हरेः ॥ स्वरूपाभिव्यक्तिरूप फलं भक्ते र्हरे र्नये ॥ एकादशेऽ (॥ ११ ॥) वदद्भक्ति तारतम्यं तदुत्तरे (॥ १२ ॥) त्रयोदशेऽवदद्विश्वपालकत्वं हरे र्नये (॥ १३ ॥) आत्मप्रसादैकसाध्य मापरोक्ष्यं रमेशितुः ॥ इत्यर्थमाह भगवान्नये व्यासश्चतुर्दशे (॥ १४ ॥) नये पंचदशे प्राह गुणित्वं जगदीशितुः (॥ १५ ॥) अलौकिकत्वमव-दत्तद्गुणानां तु षोडशे (॥ १६ ॥) कादिकादिगुणौवस्य व्यासः सप्तदशे नये (॥ १७ ॥) कादिकादिगुणाभास भावमाह जगत्प्रभुः ॥ प्रागुक्तान्य कृतामेव श्रीशस्य समसीषधत् ॥ अष्टादशे नये व्यासः (॥ १८ ॥) सर्वे

कर्तृत्वसाधनं ॥ स उपांत्यनये चक्रे (॥ १९ ॥) नये त्ये फलदातृतां (॥ २० ॥) आह्हैकविंशति नयाः तृतीयस्य द्वितीयके ॥

तृतीयस्य तृतीयांघ्रा वुदितोपासना हरेः ॥ आद्ये नये सर्वशाख श्रुति मत्यो श्च कार्यता ॥ समर्थिता सूत्रकृता (॥ १ ॥) हरेः सार्वत्रिकान् गुणान् ॥ उपसंहृत्य तध्द्यानं द्वितीये कार्यमाह सः (॥ २ ॥) तृतीये तूपसंहारानुपसंहारायोर्नये ॥ युक्तत्वं कर्तृभेदेन तूपसंहृति कार्यतां (॥ ३ ॥) तुर्ये फलाधिकत्वोत्त्या प्राह सर्वाधिकारिणां (॥ ४ ॥) साधारणं गुणो-पास्तिनिर्णयं प्राह पंचमे ॥ ५ ॥ प्राह प्रियशिरस्त्वादेः षष्ठे सर्वानुपास्यतां ॥ ६ ॥ सप्तमे त्वमरादीनां बहुसद्गुणचिंतनं ॥ ७ ॥ उक्तोपसंहृत्यनुप-संहृत्योर्मानमष्टमे ॥ नये जगाद (॥ ८ ॥) प्रागुक्तचतुर्गुणविचिंतनं ॥ नवमे साधयामासा (॥ ९ ॥) नुपसंहारमानतां ॥ प्रागुक्ता मात्म शब्दस्य दशमे समसीषधत् ॥ १० ॥ एकादशेऽलौकिकानां गुणान्नां ध्येयतोक्तिता ॥ नये सूत्रकृता (॥ ११ ॥) वाण्याः क्रियाणामुपसंहृतिः ॥ न विशिष्य गुणानां च्च किंतु सामान्यतश्च सा ॥ इत्यर्थं द्वादशे प्राहा (॥ १२ ॥) नुपसंहार मानतां ॥ आत्मशब्दाचेति सूत्र प्रोक्तामात्मपदस्य तु । नये समर्थ यामास वेदव्यासस्त्रयोदशे ॥ १३ ॥ संभृत्यादिगुणानां स प्राह सर्वानु-पास्यतां ॥ चतुर्दशे ॥ १४ ॥ पंचदशे गुणानामुपसंहृतिः ॥ कार्येति सर्वशः प्राह ॥ १५ ॥ कर्माद्यद्यनुपास्यतां ॥ वेधादेः षोडशे ॥ १६ ॥ प्राह मुक्तावप्यस्तितोदिता ॥ हर्युपास्तेः सप्तदशे (॥ १७ ॥) नियतिः कर्मणां कृतेः ॥ अष्टादशे तु मुक्तानां ब्रह्मसूत्रकृतोदिता (॥ १८ ॥) तदुत्तर नये मोक्षनैयत्यं ब्रह्मदर्शिनां (॥ १९ ॥) उपासनाधिकारस्य नियमं तार-तम्यतः ॥ तदुत्तरनये प्राह (॥ २० ॥) ततः प्राणावसानतां ॥ उपासका नामवद (॥ २१ ॥) त्प्राणादुत्तमतां हरेः (॥ २२ ॥) ततः प्राह हरे रेव प्राणादुत्तमतां ततः ॥ उपासनेऽधिकारस्य भावः संसाधितः श्रियः ॥ चतुर्विंशे नये तेन (॥ २४ ॥) श्रवणादि त्रयस्य च ॥ कर्तव्यतां प्राह नये

पंचविंशे तदुत्तरे (॥ २५ ।) प्रीत्या गुरूपदेशाख्यमुपास्तेरंगमाह सः ॥ ततो गुरुप्रसादस्य साधनेषु बलिष्ठतां (॥ २६ ॥) पूर्वपाप्तादन्य गुरोः स्वीकार्यत्वं (॥ २७ ॥) ततोऽवदत् (॥ २८ ॥) ज्ञानस्यैव ततः प्राह सूत्रकृन्मुक्तिहेतुतां (॥ २९ ॥) तदुत्तरनये तेन सैवाक्षिप्य समर्थिता (॥ ३० ॥) तदुत्तरे दर्शनस्य प्राह भक्त्यादिकार्यतां (॥ ३१ ॥) तारतम्यं दर्शनस्य तदुत्तरनयेऽवदत् (॥ ३२ ॥) बिंबज्ञानस्य सन्मुक्ति हेतुत्वं तु तदुत्तेर (॥ ३३ ॥) भक्तेर्यदृष्टि हेतुत्वं स्वातंत्र्येण तु तन्न च (॥ ३४ ॥) इत्युत्तर नये प्राह त्वैक्यमंशांशिनोस्ततः ॥ ३५ ॥ ब्रह्माद्यंगसुरोपास्तेः कार्यतामाह तूत्तरे (॥ ३६ ॥) आह सर्वोपास्यतां तु ततो भूमगुणस्य तु (॥ ३७ ॥) तारतम्येनैव सर्वोपास्यतां तु तदुत्तरे (॥ ३८ ॥) ततो बिंबोपासनस्य विकल्पेनैव कार्यतां (॥ ३९ ॥) काम्यविध्योक्तरूपाणां गुणानामप्युपासनं । विकल्पेनैव कर्तव्यमित्याह तदुत्तरे (॥ ४० ॥) हीश्वरांगाश्रितत्वेन ब्रह्मादीनामुपासनं ॥ कार्यं दैवैरिति प्राहोपांत्ये तु भगवान्नये (॥ ४१ ॥) नयांते प्राह देवान्यैरुक्तोपास्तेरकार्यतां (॥ ४२ ॥) चत्वारिंशद्द्वौ च नयाः तृतीयस्य तृतीयके ॥

तृतीयस्य चतुर्थेंघ्रौ ज्ञानसामर्थ्यमीरितं ॥ आद्ये ज्ञानस्य सर्वार्थसाधनत्वमुदीरितं ॥ १ ॥ नये द्वितीये तद्ज्ञानं न समस्ताधिकारिकं ॥ इत्याह (॥ २ ॥) तारतम्यस्य सत्तामाह तृतीयके (॥ ३ ॥) ज्ञानाधिकारे तुर्ये तु विशेषं ज्ञानिनोऽवदत् (॥ ४ ॥) सदसत्संप्रवृाचिभ्यामाह पंचमके नये (॥ ५ ॥) ब्रह्मज्ञानस्याधिकारिमात्रप्राप्यत्वमाह सः ॥ ब्रह्मज्ञानस्य देवानां पदानाकांक्षिभिर्नरैः ॥ प्राप्यत्वमाह षष्ठे तु (॥ ६ ॥) ज्ञानं सान्निधिमात्रतः ॥ अस्वामिनोऽपि फलदमिति सप्तमकेऽवदत् (॥ ७ ॥) आधिक्यमष्टमे ज्ञाने विशेषादधिकारिणां ॥ गतीनामाह सर्वेभ्यो नवमे त्वतिगोप्यतां ॥ ज्ञानस्याह परोक्षस्य (॥ ९ ॥) दशमे सूत्रकृन्नये ॥ आह साधन संपत्ति जन्मन्ये-

बोदयं दृशेः ॥ अभावे प्रतिबंधस्य स्वोदयादुत्तरक्षणे (॥ १० ॥) ज्ञानं मुक्तिप्रदातृ स्यात्प्रतिबंधो भवेन्न च ॥ इति प्राह नयेंऽत्ये तु (॥ ११ ॥) भगवान्त्सूत्रकृद्धरिः ॥ तृतीयस्य तुरीयेंऽघ्रौ नया एकादशेरिताः ॥ इति तृतीयोऽध्यायः ॥

उक्त्वाऽथब्रह्मजिज्ञासापदार्थान् लक्षणैस्त्रिभिः ॥ तुर्येऽतः पदबोध्यस्य मोक्षस्याह स्वरुपकं ॥ कर्मक्षयोत्क्रांतिमार्गभोगरूपस्य लक्षणे ॥ कर्मक्षयं तु प्रथमे प्राधान्येन न्यरूरुपत् ॥ प्राथम्याद्भगवान्पादेऽत्यत्रश्यंभात्रि साधनं ॥ न्यरूरुपत्सप्तनय्यां श्रुत्याद्यावृत्तिकार्यतां ॥ आदावाह नये (॥ १ ॥) तत्राऽऽत्मत्वोपास्तेर्द्वितीयके ॥ नित्यशः कार्यतामाह (॥२॥) तृतीये तु न्यवारयत् ॥ विष्णुप्रतीकयोरैक्यो पास्तिं (॥ ३ ॥) तुर्ये नयेऽब्रवीत् आवश्यकत्वं ब्रह्मत्वोपास्तेः (॥ ४ ॥) पंचम आह सः ॥ स्वास्त्राश्रयांगकत्वेन श्रीशोपास्तेः सुकार्यतां (॥ ५ ॥) सुरैः षष्ठे तु नियममासनादेरुपासने (॥ ६ ॥) ध्यानस्य प्रायणांतत्वं सप्तमेऽसाधयन्नये (॥ ७ ॥) प्रासंगिकं समाप्यैवमीश्वराधिगमाध्द्रुवं ॥ कर्मक्षयामिधफलसिद्धिरित्यष्टमेऽवदत् (॥ ८ ॥) तुरीयस्याद्यचरणे नयाः अष्टौ समीरिताः ॥ देवानां स्वोच्चदेवेषु लयमुत्क्रांतिमाह च ॥

तुरीयस्य द्वितीयांघ्रौ वाचो मनसि संलयं ॥ आदावाह नये (॥ १ ॥) प्राणे लयं तस्य द्वितीयके (॥ २ ॥) वाणीपतेर्लयं त्वीशे नये प्राह तृतीयके (॥ ३ ॥) लयं मुक्तान्यदेवानां पंचभूताभिमानिषु ॥ चतुर्थे तु (॥ ४ ॥) नये प्राह सर्वभूतेषु पंचमे (॥ ५ ॥) समर्थितः सुराणां तु लयः षष्ठे श्रियो हरौ (॥ ६ ॥) लयाभावः सूत्रकृता परमात्मनि संलयं ॥ विरिंचेतरदेवानां सप्तमे हरिरब्रवीत् (॥ ७ ॥) मुक्तानां हर्यधीनत्वं नये त्ववददष्टमे (॥ ८ ॥) देवानां लयमुत्क्वैवं मनुष्यज्ञानिनामथ । विलक्षणोत्क्रांतिमन्योत्क्रांतितो नवमेऽवदत् (॥ ९ ॥) आवश्यकत्वमंते तु विद्याया गत्यनुस्मृतेः (॥ १० ॥) प्राह द्वितीये चरणे तुरीयस्य नया दश ॥

३. ॥ मार्ग—गम्यपादः ॥

उत्क्रांतानां तु यः पंथाः प्राप्तौ तेन पथा हरेः ॥ गतानाममराणां च यद्गम्यं तद्वयं प्रभुः ॥ तुरीयस्य तृतीयांघ्रौ सूत्रकृत्संन्यरूरुपत् ॥ तत्र विष्णु प्राप्तिमार्गे आदावर्चिष आदितां ॥ नये वायो (॥ १ ॥) द्वितीये तु तदानंतर्यमाह हि (॥ २ ॥) तृतीये प्राप्यतामाह तडितो वत्सरात्परं ॥ ३ ॥) आतिवाहिकतामाह तुर्ये त्वर्चिरनंतरं (॥ ४ ॥) प्राप्य वायोर्मुख्यवायो रंतिमत्वं तु पंचमे ॥ नये ब्रह्मप्राप्तिमार्गे सूत्रकृत्समसीषधत् (॥ ५ ॥) एवं मार्गं संविचार्य पंचनय्या (:) श्रुतीश्वरः ॥ कृष्णो गम्यस्वरूपं तु नये षष्ठे न्यरूरुपत् (॥ ६ ॥) तुरीयस्य तृतीयेऽघ्रौ नयाः षडिति कीर्तिताः ॥

४. ॥ भोगपादः ॥

चतुर्थस्य चतुर्थेऽघ्रौ चतुर्वक्त्रेण केशवं ॥ गतानां सह यो भोग स्तं व्यासः संन्यरूरुपत् ॥ ब्रह्मानतिक्रमेणैव मुक्तानां प्रथमे नये ॥ भोगानुभव माहेशो (॥ १ ॥) ब्रह्म प्राप्याऽविहाय तत् ॥ भुञ्जानस्याखिलान् द्वितीये त्वाह मुक्ततां (॥२॥) ज्योतिषो मुक्तगम्यत्वं ब्रह्मत्वं तु तृतीयके (॥३॥) सायुज्यभाजां तुर्ये तु श्रीशसंमुक्तभोक्तृतां (॥ ४ ॥) निरस्य देहविरह प्रयुक्तां भोक्तृतां हरिः ॥ मुक्तस्य भोक्तृतामाह सूत्रकृत्पंचमे नये (॥ ५ ॥) मुक्तस्य संकल्पमात्रसाध्यभोगित्वमब्रवीत् ॥ षष्ठेऽ (॥ ६ ॥) धमनियम्य त्वराहित्यं सप्तमेऽवदत् (॥ ७ ॥) निराह मुक्तसंभोगानुपपत्ति नयेऽष्टमे (॥८॥) भोगेयत्तां तु मुक्तस्य नवमे प्राह सूत्रकृत् (॥ ९ ॥) वृध्दिर्ह्रासश्च नेत्याह भोगादेर्मुक्तसंततेः ॥ दशमे पुनरावृत्तिं मुक्तानामंतिमे नये ॥ अवदद्भगवान् व्यासः श्रीशसज्ज्ञानसिद्धये (॥ १० ॥)

तद्वाक्यपद्मसौरभ्यं व्यञ्जयन्मध्वमारुतः ॥
तापानपाहरत्स्वानां कृपापूरः सुशीतलः ॥

तुर्याध्यायतुरीयांघ्रौ नया एकादशेरिताः ॥
एवं षोडश पादेषु मेलने खरशः नयाः (॥ २२२ ॥)

इति श्रीमद्ब्रह्मसूत्राधिकरणरत्नमालायां श्रीसुधींद्रयति विरचितायां चतुर्थोऽध्यायः समाप्तः ॥ श्रीशः शरणं ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीमध्वेशार्पणमस्तु ॥

॥ समाप्तोऽयं ग्रंथः ॥

श्रीकृष्णाचार्य (श्रीमत्सुमतीन्द्रगुरुभरु)विरचिता
तत्वप्रकाशिकान्यायमालिका

|| श्रीमन्मूलरामः प्रसीदतु ||

|| श्रीगुरुराजो विजयते ||

|| श्रीकृष्णाचार्य(श्रीमत्सुमतींद्रगुरु)विरचिता तत्वप्रकाशिकान्यायमालिका ||

(सिद्धांतन्यायसंग्रह)

श्रीगुरुभ्यो नमः । हरिः ॐ वेदव्यासं वेदवेदांतवेद्यं वेदांतानां
वेदनाहेतुसूत्रम् ।
वेदान्तानां चेतसो गोचरं तं वंदे वंद्यं वंद्यमानैः सुराद्यैः || १ ||
इंदीवरनिभं देवं इन्दिरावासमंदिरम् ।
वंदारुजनमंदारं वंदेऽहं यदुनन्दनम् || २ ||
श्रीमदानंदतीर्थार्यपादपंकजमुत्तमम् ।
शर्वादिसर्वगीर्वाणवंद्यं वंदे पुमर्थदम् || ३ ||
जयतीर्थमुनीन् वंदे जयतीर्थान् जयप्रदान् ।
जयीन्द्रानंदतीर्थार्यप्रसादाज्जयशालिनः || ४ ||
पूर्णप्रसोपदिष्टोऽसौ जयतीर्थप्रदर्शितः ।
नारायणनिधिर्येन दत्तस्तं व्यासमाश्रये || ५ ||
यो व्यासमुनिसंप्रोक्तग्रन्थत्रितयदुर्गतः ।
अजेयेंद्रान्विजिग्ये तं विजयींद्रगुरुं भजे || ६ ||
अबुधीकृतदुर्लोकान् विबुधीकृतसज्जनान् ।
श्रीसुधीन्द्रमुनीन्वन्दे सर्वशास्त्रविशारदान् || ७ ||
सुधाव्याख्यादिभिः सर्वसज्जनोद्धारतत्परान् ।
राघवेंद्रगुरून्वंदे मम विद्यागुरूनहम् || ८ ||

ब्रह्मसूत्रोदितन्यायाः पूर्णबोधप्रकाशिताः ।
क्रियते संग्रहस्तेषां कृष्णाचार्येण धीमता || ९ ||
प्रत्यध्यायं चतुरध्यायं विष्णवाख्यं ब्रह्म सद्गुणं ।
पूर्वस्मिन् लक्षणे प्रोक्तः सर्वशब्दसमन्वयः || १० ||
द्वितीये लक्षणे त्वस्य विरोधोऽयं निराकृतः ।
तृतीये लक्षणे मोक्षसाधनं समुदाहृतम् || ११ ||
तुर्ये सल्लक्षणे प्रोक्तं तत्साध्यफलमुत्तमम् ।
अथ षोडशपादेषु प्रतिपाद्यं प्रकाश्यते || १२ ||
शब्दाश्चतुर्विधास्तत्रान्यत्रोभयत्र च (न्यात्रान्यत्रैव संभवः) ।
प्रसिद्धा इति ते सर्वे नामलिङ्गात्मना द्विधा || १३ ||
तत्रप्रसिद्धा विष्णवैकनिष्ठा विष्ण्वादिगीर्यथा ।
तदेकनिष्ठतासिद्धे न कार्यस्तत्समन्वयः || १४ ||
यत्रान्यवृत्तिरेकैव समन्वयविरोधिनी ।
अन्यत्र च (उभयत्र) प्रसिद्धं तदक्षरादिवचो यथा || १५ ||
ब्रह्मवृत्त्यन्यवृत्ती द्वे विरोधिन्यौ समन्वये ।
तत्रान्यत्र प्रसिद्धं तदिंद्राकाशादिगीर्यथा || १६ ||
उक्तद्वयं ब्रह्मवृत्तौ बाधकं च (कत्वं) त्रयं यदा ।
अन्यत्रैव प्रसिद्धं तद्दुःखिबद्धादिगीर्यथा || १७ ||
आपातरूढिरहितं धर्मद्वारा च धर्मिगं ।
लिंगमन्यत्ततो नामांतर्यामींद्रादिगीर्यथा || १८ ||
अन्यत्रैव प्रसिद्धानां दुर्घटावगतित्वतः ।
सर्वाधिकारवैधुर्या(चांत्यांघ्रौ)त्तुर्यांघ्रौ तत्समन्वयः || १९ ||
अन्येष्वपि महामल्लभीरुभंगतया कृतः ।
आद्येऽन्यत्र प्रासिद्धानां नाम्नां तस्यापि मुख्यतः || २० ||

अमुख्यत्वादन्यगतलिंगानां तद्द्वितीयगः ।
उभयत्रप्रसिद्धानां नामलिंगात्मनामपि ॥ २१ ॥
समन्वयस्तृतीयेंघ्रौ कुतोऽत्रैव प्रसंगतः ।
देवशूद्राधिकारतदभावौ विचारितौ ॥ २२ ॥
छंदोभिधासमाकर्षौ द्वावंतौ गुणिकौ नयौ ।
द्वितीयलक्षणाद्यांघ्रौ हरावुक्त समन्वये ॥ २३ ॥
युक्त्यादिभिर्विरोधें चेत् स विरोधो निराकृतः ।
द्वितीयपादे ह्युभयविरोधोऽत्र निराकृतः ॥ २४ ॥
मिथःश्रुत्येर्विरोधस्तु (धे तु) तृतीयेंघ्रौ निराकृतः ।
चतुर्थे युक्तिसाहितश्रुतिरोधो निराकृतः ॥ २५ ॥
पत्यादेरिव भङ्गेऽश्वगजादीनां प्रवर्तना ।
भङ्गो तु (द्दु) ल्य(दूष्य)युक्त्यादेः समयादेर्निराकृतिः ॥ २६ ॥
स्मृतीनां चतुरात्मत्वात् सर्वादौ तन्निराकृतं ।
तृतीये प्रथमे पादे वैराग्यं भक्तिरेव च ॥ २७ ॥
द्वितीयेऽत्र तृतीये च ह्युपासनमथांतिमे ।
चरमे ज्ञानमाहिमा वर्णितो हि यथाक्रमं ॥ २८ ॥
अत्र वैराग्यतो भक्तिः भक्त्या चोपासनं भवेत् ।
उपासनाच्चापरोक्ष ज्ञानमित्येव हेतुतः ॥ २९ ॥
उत्तरोत्तरहेतुत्वात्पूर्वस्यांघ्रिक्रमो भवेत् ।
चतुर्थलक्षणाऽऽद्यांघ्रौ कर्मनाशः प्रकीर्तितः ॥ ३० ॥
द्वितीयपादेऽप्युत्क्रांतिस्तृतीये मार्ग एव च ।
भोगश्चतुर्थे संप्रोक्तः उत्तरोत्तर हेतुतः ॥ ३१ ॥
अत्रत्यानां क्रमो ज्ञेयः इति पादार्थ संग्रहः ॥ ३२ ॥
सर्वाधिकरण पूर्वपक्ष सिद्धांतगा नयाः ।
वक्ष्यंते श्लोकरूपेण संग्रहेण यथामति ॥ ३३ ॥

१. ॐ ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥

अहंधिया ब्रह्मसिद्धेस्तस्यैव ब्रह्मभावतः ।
तज्ज्ञानान्मुक्त्यभावात्सा जिज्ञासा नाऽवकल्प्यते ॥ १ ॥
जिज्ञास्ये ब्रह्मशब्दस्य गुणपूर्णत्ववाचिनः ।
श्रवणाद् ब्रह्म जीवान्यजिज्ञासाऽतोऽवकल्प्यते ॥ २ ॥

२. ॐ जन्माद्यस्य यतः ॐ ॥

ननु च ब्रह्मशब्दोऽयं जीवे स्यात्तत्र रूढितः ।
न विष्णौ तत्र योगेऽपि यतो रूढिर्बलीयसी ॥ ३ ॥
रूढेस्तु बलवत्त्वेऽपि जगद्धेतुत्वबाधकात् ।
विद्वद्रूढिश्रौतयोगसत्वाच्चायं हरिर्भवेत् ॥ ४ ॥

३. ॐ शास्त्रयोनित्वात् ॐ ॥

शैवाद्यागमसंसिद्धसार्वज्ञाद्यनुमानतः ।
जगज्जन्मादि हेतुत्वं रुद्रादेरपि युज्यते ॥ ५ ॥
न कारणत्वमन्येषां कल्प्यं शैवागमादितः ।
कारणत्वस्य शाब्दत्वान्नावेदविदिति श्रुतेः ॥ ६ ॥

४. ॐ तत्तु समन्वयात् ॐ ॥

शिवादेरपि वेदेषु कारणत्व प्रतीतितः ।
तद्युक्त्यागमतश्चाह शिवादेरपि तद्भवेत् ॥ ७ ॥
उपक्रमादितात्पर्यलिङ्गेभ्यो विष्णुरेव हि ।
मुख्यवृत्त्या शास्त्रवेद्य इति तस्यैव हेतुता ॥ ८ ॥

५. ॐ ईक्षतेर्नाऽशब्दं ॐ ॥

यतोवाच इतिश्रुत्या ब्रह्मणोऽवाच्यतोक्तितः ।
मुख्यवृत्त्या शास्त्रवेद्यं ब्रह्मेति कथमुच्यते ॥ ९ ॥
वाच्यं ब्रह्मेक्षणीयत्वादात्मशब्दादिहेतुतः ।
न गौणस्येक्षणा तच्च शब्देनैव न चान्यथा ॥ १० ॥

६. ॐ आनन्दमयोऽभ्यासात् ॐ ॥

ब्रह्म तत्पुच्छतोक्त्यादे नैवानन्दमयादिकं ।
किं तु प्रकृतिरन्यैव विकारादेः श्रुतत्वतः ॥ ११ ॥
अभ्यासाद् ब्रह्मशब्दादेर्मन्त्रवर्णोक्तिपूर्वतः ।
श्रुतौ तस्यैव गत्युक्तेः ब्रह्मानन्दमयादिकं ॥ १२ ॥

७. ॐ अंतस्तद्धर्मोपदेशात् ॐ ॥

अंतःप्रविष्टमित्यादौ अंतःस्थोऽन्यः पुरंदरः ॥
सूर्यादिर्वेद्रशब्दोद्वा तत्तल्लिंगादिहापि तु ॥ १३ ॥
समुद्गत्वब्रह्माण्डवीर्यत्वादीशलिंगतः ।
अंतःस्थो हरिरेवस्यात्तच्छब्दादि हरेर्भवेत् ॥ १४ ॥

८. ॐ आकाशस्तल्लिंगात् ॐ ॥

अस्य लोकस्यकेत्यत्राकाशो भूतप्रसिद्धितः ।
जडत्वात्तदधीनत्वन्यायस्य तदसंभवात् ॥ १५ ॥
अनंतोक्तित्वलिंगाच्च हरिः खंचेतना तदपि ।
तदधीनजडस्यापि शब्दवृत्तिर्हरौभवेत् ॥ १६ ॥

९. ॐ अतएव प्राणः ॐ ॥

तद्वै त्वं प्राण इत्यत्र प्राणो मुख्यः प्रसिद्धितः ।
तत्प्रवृत्तिनिमित्तस्य श्रुत्यादेस्तत्रसंभवात् ॥ १७ ॥
प्राणो विष्णुरेवस्यात् श्रीपतित्वादिलिंगतः ।
प्राणप्रदत्वाचास्यैव न प्राणो न विशेब्दतः ॥ १८ ॥

१०. ॐ ज्योतिश्चरणाभिधानात् ॐ ॥

विमेकर्णेति वाक्येऽस्मिन् ज्योतिरग्निः प्रसिद्धितः ।
हृत्स्थलिंगात्तधदृत्वादग्निसूक्ते श्रुतत्वतः ॥ १९ ॥
श्रवणादिविदूरत्वं विष्णोरन्यस्य नैव हि ।
अतो ज्योतिर्विष्णुरेव तच्छब्दानामिहान्वयात् ॥ २० ॥

११. ॐ छंदोभिधानान्नेतिचेन्नतथाचेतोऽर्पण
निगदात्तथा हि दर्शनं ॐ ॥

गायत्रीति श्रुतौ छंदो गायत्री तत्प्रसिद्धितः ।
नित्यत्वान्न हि गायत्र्याः तादधीन्यतया भवेत् ॥ २१ ॥
विष्णुरेवात्र गायत्री गातृत्वात्त्रलिंगतः ।
द्रव्यं कर्मेति नित्यानांमितिस्ति(समस्ति)तदधीनता ॥ २२ ॥

१२. ॐ प्राणस्तथानुगमात् ॐ ॥

ता एवा इति वाक्यादौ प्राणो मुख्यः पुरंदरः ।
जीवोवा प्राणसंवादश्रुतिलिंगादिभिर्भवेत् ॥ २३ ॥
विष्णुर्विद्रादिशब्दादिरंतर्यामिदिशा भवेत् ।
एकत्रिंशत्सूत्रयुक्तो द्वादशन्यायसंयुतः ॥ २४ ॥
समाप्त आद्यस्याद्यांघ्रिः सिद्धांतन्यायसंग्रहे ।

इति श्रीकृष्णाचार्यकृतसिद्धांतन्यायसंग्रहे प्रथमाध्याये-
प्रथमपादः समाप्तः ॥

॥ अथ प्रथमाध्याये द्वितीयपादः ॥

१. ॐ सवत्रप्रसिद्धोपदेशात् ॐ ॥

सर्वेषु भूतेष्वित्यत्र सर्वगोऽर्कस्तु तच्छ्रुतेः ।
सूर्येऽनुक्तत्वादिलिंगैर्जीवश्चक्षुर्मयत्वतः ॥ १ ॥

२. ॐ अत्ता चराचरग्रहणात् ॐ ॥

सविष्णुस्तत्र सांसिद्ध ब्रह्मशब्दोपदेशतः ।
अचृत्वादिलिंगेभ्यस्तच्छब्दादिर्हरेर्भवेत् ॥ २ ॥
चराचरातृत्वलिंगादूब्रह्मोपकरणादपि ।
सर्वात्ता विष्णुरेव स्यात्तच्छब्दादि हरेर्भवेत् ॥

—[असमग्रं]*

* एतावदेवोपलब्धं । अवशिष्टं मृग्यं । लभ्यते चेदवस्यं प्रेषणीयमस्माकं प्रकाशनाय सुधीभिः ।
--आर. एस. पंचमुखि

श्री श्रीनिवासाचार्य (श्री वादींद्रतीर्थ)कृत
नव्यदुरुक्तिशिक्षाप्रारंभः

॥ श्री श्रीनिवासाचार्य(श्रीवादींद्रतीर्थ)कृत नव्यदुरुक्तिशिक्षाप्रारंभः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीमन्मूलरामो विजयते ॥

॥ श्रीमद्राघवेंद्रतीर्थगुरुभ्योनमः ॥

तत्त्वं जीवेशभेदप्रभृति भगवता प्राणि (भाणि) सूत्रेषु तेषा– ।
मर्थे स्व.... ....(स्पष्टं)कृतिषु बहुधा साधि(ऽत्याधि)तात्पर्यमार्यै(र्यैः)॥
अन्यैरत्र प्रयुक्तोऽध्वनि गुरुचरणैरुद्धृतः कंटकोऽपि ।
प्रत्याख्यातुं प्रवृत्ते (वृत्तः) कृतिमहमधुना नूतनोक्तैरयुक्तैः ॥ १ ॥
श्रीराघवेंद्रकुलवारिधिकौस्तुभस्य श्रीश्रीनिवासकृतिनः कृतिमत्युदारां ।
दृष्ट्वाऽनघामभिनवोक्तिदुरुक्तिशिक्षां मोदं प्रमोदनिधयः
सुधियो भजंतु ॥ २ ॥
यः पाण्ड्यक्षितिपतिमंत्रिमध्यमुख्यः सेनानीरखिलविदार्यसांवयस्य ।
विख्यातस्त्रिजगदुदारसार्वभौमः तेनैतत्कृतिमहमर्थितः करोमि ॥ ३ ॥

इह खलु निखिलमुनिकुलोत्तमगौतममहर्षिशापाद्द्वापरे परिलुप्ततत्व-बोधेष्वनुजिघृक्षुभिः ब्रह्मरुद्रपुरःसरैः तत्वनिर्णयार्थमर्थितो भगवान्नारायणो बादरायणरूपेणावतीर्य उत्सन्नान्वेदान्बहुधा विभज्य तदर्थनिर्णयाय प्रमीयमाने हि वेदेन करणात्मना इतिकर्तव्यताभागं मीमांसा पूरयिष्यतीत्यभियुक्तोक्तेर्वेदेनेतिकर्तव्यताभूतं न्यायनिबंधनात्मकं अनेकसूत्रात्मकं ब्रह्ममीमांसाशास्त्रं प्रणिनाय । तदुक्तं स्कांदे । नारायणाद्विनिष्पन्नमित्यादिना । तदिदं ब्रह्ममीमांसा शास्त्रं अनतिस्फुटाशयं प्रत्याभिन्न (गभिन्न) निर्विशेषब्रह्मविषयतया शंकरादयो

व्याचख्युः ॥ श्रीमदानंदतीर्थभगवत्पादास्तु । समस्तचेतनाचेतनविलक्षणं सत्याखिलजगज्जन्मादिकारणं अनंतकल्याणगुणशालि यद्विष्णुरूपं परं ब्रह्म तत्परतया योजयामासुः । तत्परस्परविरुद्धार्थप्रतिपादनपराणां भाष्याणां व्याससूत्र-तात्पर्यविषयार्थे समुच्चित्यप्रामाण्ये तत्प्रतिपाद्यवस्तुनः विरुद्धनानारूपताऽऽपत्तेः अवश्यमन्यतमस्यैव एतेष्वपि भाष्येषु प्रामाण्ये स्वीकार्ये तद्विशेषजिज्ञासायामाप्ति-मूलत्वादिहेतुभिः स्वभाष्यप्रामाण्यं भगवत्पादाः प्रत्यपादयन् । एवमेतैरेव हेतुभिरितरेऽपि भाष्यकृच्छंकरादयः स्वभाष्यप्रामाण्यमुपवर्णयांबभूवुः । अथ कश्चिदर्वाचीनः । भाष्यप्रामाण्यनिर्णायकतया सर्ववादिसम्प्रतिपन्नानामाप्ति-मूलत्वादिहेतूनामशेषभाष्यसामान्यप्रतिपत्तेरन्यतमभाष्यप्रामाण्यानिर्णायकत्वात् । अनतिप्रसक्ततया प्रतीयमानेन सांख्यानुवादेनैवान्यतमभाष्यप्रामाण्यनिर्णयो वाच्यः । तेन च शांकरस्य निर्विशेषश्रुतिसूत्रयोजनस्यैव प्रामाण्य-मवसीयते इति तदेव भाष्यं प्रमाणतया सर्वैरपि वैदिकैरभ्युपेयमित्यजल्पत् । तस्यायमाशयः । वेदांतशास्त्रतात्पर्यविषयीभूतार्थं (निर्णये) प्रवृत्तानि भगवद्-व्याससूत्राणि, शंकर–भट्ट भास्कर–यादवप्रकाश–रामानुज–मध्व–श्रीकंठा-दयो भाष्यकृतः स्वस्वाभिमतार्थपरतया व्याचख्युः । तत्र जीवब्रह्मणोरभेदः स्वाभाविकः पारमार्थिकश्च । भेदस्त्वौपाधिकः । अपारमार्थिकश्चेति शंकराभि-मतोऽर्थः । तयोरभेदः स्वाभाविकः पारमार्थिकश्च । भेदस्त्वौपाधिकः पार-मार्थिकश्चेति भट्टभास्कराभिमतोऽर्थः । यादवप्रकाशाभिमतोऽर्थश्च । तयोः स्वाभाविको भेदोऽभेदश्च । रामानुजीय श्रीकंठयोस्तु तयोः स्वाभाविक एव भेदः । विशिष्टाद्वैतं चेत्यभिमतोऽर्थः । तथापि विष्णुपारम्यं शिवपारम्यं च तन्मतयोर्विशेषः । तयोः स्वाभाविक एव भेदः इति आनन्दतीर्थाभिमतोऽर्थः । तत्रैवं परस्परविरुद्धार्थप्रतिपादनपरेषु भाष्येषु एकस्यैव भाष्यस्य व्याससूत्र-तात्पर्यविषयीभूतार्थे प्रामाण्ये वर्णनीये तद्विशेषजिज्ञासायां आप्तमूलत्वादिहेतु-भिरेव तेषु सर्वेष्वपि भाष्येषु अन्यतमस्यैव भाष्यस्य प्रामाण्यानिर्णय इति प्राञ्चः । तदसत् । अतिप्रसंगात् । तथाहि । तत्र न तावदाप्तिमूलत्वेन तेषु भाष्येषु अन्यत-

मभाष्यप्रामाण्यनिर्णयः । “द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने। चतुर्भिः सहितः शिष्यैः शंकरोऽवतरिष्यति” ।। इति वचनाच्छंकराचार्याणां शिवावतारत्वेन । अनंतः प्रथमं रूपं लक्ष्मणस्तु ततः परं । बलभद्रस्तृतीयं तु कलौ कश्चिद्भविष्यति । इति वचनाद्रामानुजाचार्याणां शेषावतारत्वेन । प्रथमो-हनुमान्नाम द्वितीयो भीम एव च । पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः इत्यादिवचनान्मध्वाचार्याणां वाय्ववताररूपत्वेन । एवमन्येषामपि भाष्यकाराणां तत्तद्भाष्यकारोदाहृतवचनैः तत्तदभितदेवतापरत्वेन आप्तत्वप्रतीत्या शंकरभाष्यस्येव भाष्यांतराणामपि आप्तमूलत्वप्रतीतेरवर्जनीयत्वात् । तत एव संप्रतिपन्नप्रबंधमूलत्वेनापि तेष्वन्यतमभाष्यप्रामाण्यनिर्णयः । ‘तामष्टादशधा सृष्ट्वा शंकरः सूत्रसंहितां । चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरं’ । इत्याद्यभियुक्तोक्तेः । सूत्रसंहितामादाय शंकरभाष्यस्येव भगवद्बोधायनकृतौ विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यंते । अथाऽतो ब्रह्मजिज्ञासेति । तद्वचनाद्बोधायनवृत्तिमादाय रामानुजीयभाष्यस्य । आनन्दतीर्थमुनेः ब्रह्मतर्कोक्तमार्गतः इत्यादिवचनैरानन्दतीर्थीयभाष्यस्य । एवमन्येषामपि भाष्यकाराणां तत्तदुदाहृतवचनैस्तत्तत्प्रबंधजातादिक्रमादाय संप्रतिपन्नप्रबंधमूलत्वप्रतीतेरवर्जनीयत्वात् । अत एव न प्रत्यक्षादिप्रमाणमूलत्वेनापि तेष्वन्यतमभाष्यप्रामाण्यानिर्णयः । नेंद्रियाणि नानुमानं वेदाह्येवैनं वेदयंति । औपनिषदः पुरुषः । कामाच्च नानुमानापेक्षा । तर्काप्रतिष्ठानात् । न च केवलतर्केण नाक्षजेन न केनचित् । केवलागमविज्ञेयो भक्तैरेवनचान्यथा ’ इत्युदाहृतश्रुतिस्मृतिसूत्रैः शब्दैकसमधिगम्ये परतत्त्वे प्रत्यक्षानुमानयोरप्रवृत्त्या शब्दैकमूलत्वस्य वक्तव्यत्वेन तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म, अविभागो वचनात्; आत्मेतितूपगच्छंति ग्राहयंति च । अरूपवदेव हि तत्प्रधानत्वात्’ इत्यादि श्रुतिसूत्राणामद्वैते सद्भाववत्, द्वासुपर्णा सयुजा सखाया, जुष्टं यदापश्यत्यन्यमीशं, पृथगात्मानं प्रेरितारं च मत्वा, पृथगुपदेशात्, भेदव्यपदेशात् रूपोपन्यासाच्चेत्यादि श्रुतिसूत्राणां द्वैतेऽपि

सद्भावेन निर्विशेषश्रुतिसूत्रस्येव सविशेषश्रुतिसूत्रयोजनस्यापि शब्दमूलत्वप्रतीतेरवर्जनीयत्वात् । न चोपक्रमादिषड्विधतात्पर्यलिंगाद्यनुसारेणान्यतमभाष्यप्रामाण्यनिर्णयः । तच्च तेषु भाष्येषु अन्यतमस्य शंकरभाष्यस्यैव प्रतीयते नान्येषामिति वाच्यं । सर्वैरपि भाष्यकारैः स्वस्वभाष्यग्रंथेषु स्वस्वाभिमतार्थ (स्य) जातस्योपक्रमादिषड्विधतात्पर्यालिंगाद्यनुगृहीतश्रुतिसूत्राक्षरस्यानुरोधित्ववर्णनेन तस्यापि सर्वसामान्यप्रतीतेरवर्जनीयत्वात् । तस्मादुक्तरीत्या व्याससूत्रतात्पर्यविषयीभूतेष्वर्थेषु न कस्यापि भाष्यस्य प्रामाण्यनिर्णय इति चेदुच्यते। यथालोके द्वयोरेकस्मिन्नर्थे प्रामाण्ये विवादप्रसक्तौ अन्यतरप्रामाण्यनिर्णयाकांक्षायां तटस्थतयोभयवादिसंप्रतिपन्नतटस्थवचनादेव तन्निर्णयः । तथोदाहृतेषु सर्वेष्वपि भाष्येषु अविशेषतः सूत्रतात्पर्यविषये अर्थे विवादप्रसक्तौ अन्यतमप्रामाण्यनिर्णयाकांक्षायां तटस्थतयोभयवादिसंप्रतिपन्नकपिलस्य तन्त्रे परमतनिराकरणावसरे व्यासमतप्रतिक्षेपाय तन्मतानुवादपरै स्सूत्रैस्तेष्वन्यतमभाष्यप्रामाण्यनिर्णयः । यद्यपि येषु सूत्रेषु विशिष्येदं भाष्यमस्मिन्नर्थे प्रामाण्य(माण)मिति न प्रतिपादितं । तथापि व्याससूत्रतात्पर्य विषयीभूततया अभेदानुवादपरैःसूत्रैर्भवति भाष्येष्वन्यतमभाष्यप्रामाण्यनिर्णयः । तथा च प्रयोगः । इदं भाष्यं व्याससूत्रतात्पर्यविषयीभूतार्थे प्रमाणं भवितुमर्हति तत्तात्पर्यविषयीभूततटस्थानुवादविषयत्वात् । यो यत्तात्पर्यविषयत्वेन तटस्थानुवादविषयः सोऽर्थस्तत्तात्पर्यविषयः । यथा सम्प्रतिपन्नं । न च सांख्यसूत्राणां व्याससूत्रतात्पर्यविषयीभूतार्थानुवादित्वे तटस्थानुवादविषयत्वरूपहेतोः स्वरूपासिद्धिरिति वाच्यं । नाविद्यतोप्यवस्तुनो बंधायोगादित्यादि सांख्यसूत्रैरनूद्यमानस्यार्थस्य स्फुटतरं प्रतीत्या हेतोः स्वरूपासिद्धेरयोगात् । न च सांख्यसूत्राणां मतांतरानुवादित्वमेवेति वाच्यं । सांख्य सूत्रं व्यासमतानुवादः मतांतरानुवादित्वे सति अनुवादित्वात् । यदितर मतानुवादित्वे सति अनुवादित्वं तत्तदनुवादः । यथासम्प्रतिपन्नमिति । न चैतावता शंकरभाष्यस्यैव व्याससूत्रतात्पर्यविषयीभूतार्थे प्रामाण्यं न भाष्यांतरस्येत्यतत्कथं सिद्धिरिति वाच्यं । नाविद्यतोऽप्यवस्तुनो बंधायोगादित्यादिसांख्यसूत्रै

रनूद्यमानार्थस्य व्याससूत्रतात्पर्य विषयत्वे तदर्थप्रतिपादकत्वेन शंकरभाष्यस्यैव व्याससूत्र तात्पर्यविषयीभूतार्थता प्रातिपादकत्वेन तद्भाष्यस्यैव तत्र प्रामाण्यसिद्धिरिति । उदितोबहुभिः शब्दैर्यत्परेणासमंजसः । अन्वयादिमितैः शब्दैस्स एवार्थोऽयमंजसा । इति श्रीनिवासकृतौ नव्यदुरुक्तिशिक्षायां पूर्वपक्षसंक्षेपः ॥ ॥ ६ ॥ ॥ ६ ॥

अत्र ब्रूमः । भाष्यप्रामाण्यनिर्णीतिराप्तोक्तत्वादिहेतुभिः । तेषु चानन्दतीर्थीयभाष्यमेवोक्तहेतुमत् । अत एवोक्तं अनुव्याख्याने । आप्तवाक्यतया तेन श्रुतिमूलतया तथा । युक्तिमूलतयाचैव प्रामाण्यं त्रिविधं महत् । इति । तेषामेव च सूत्रप्रामाण्यनिर्णयहेतुत्वोक्तिरभियुक्तानामुपपद्यते । अत एव पूर्वोत्तरतंत्रयोरपि धर्मस्य शब्दमूलत्वात् । अशब्दमनपेक्षं स्यात् । न विलक्षणत्वादस्य तथात्वं च शब्दादित्यधिकरणयोस्तैरेव वैदिकमन्वादिस्मृति प्रामाण्याभ्युपगमः । अन्यथा तदधिकरणभंग प्रसंगः । तत्र तावद्धर्मस्य शब्दमूलत्वादित्यधिकरणं प्रमाणलक्षणस्य तृतीयपादे विराचितं ! अष्टका कर्तव्या पुष्टिकामेनेत्यादि स्मृतिजातं धर्मे प्रमाणमुत नेति संदेहे संभवद्भ्रमप्रमाददोषवत्पुरुषकृतवाक्येषु मूलभूतप्रमाणमंतरा प्रामाण्य निर्णयायोगात् । समूलत्वाद्वेदार्थवादिन्येव स्मृतिरित्यभ्युपगमे वेदेनैव तदर्थज्ञप्तिसंभवे स्मृतिप्रणयनवैयर्थ्यात् अनुवादप्रसंगाच्च धर्मे अप्रमाणमेव स्मृतिजातमिति पूर्वपक्षे प्राप्ते वेदार्थानुष्ठातॄणांमेव स्मृतिकर्तृत्वेन वैदिकमन्वाद्याप्तप्रणीतस्मृतीनामुपनयनाध्ययनादिस्मृतिदृष्टांतेन वेदमूलत्वानुमानसंभवात् । वेदार्थवादित्वेप्यस्मदादीनां प्रत्यक्षेष्वप्रत्यक्षेषु च वेदेषु विप्रकीर्णस्यार्थस्य संक्षित्यार्थकथनसंभवेन वैयर्थ्याभावात् । अनुवादत्वाभावाच्च । धर्मे प्रमाणमेव स्मृतिजातमिति सिद्धांतितं । नविलक्षणत्वादित्याधिकरणमपि आविरोधलक्षणस्य तृतीयपादे विरचितं । वृष्टिकामः कारीर्या यजेतेत्यादि श्रुतिजातं धर्मे प्रमाणमुत नेति संदेहे कारीर्याद्यनुष्ठानेऽपि वृष्ट्यदृष्ट्या फलविसंवादेनाप्रमाणमेव श्रुतिः । अपौरुषेयैव न भवति श्रुतिः स्मृतिश्चैवं न मानमिति पूर्वपक्षे प्राप्ते

'वाचा विरूप नित्ययेत्यादि श्रुतिवचनैः कर्तृ स्मृत्यभावयुक्त्या श्रुतेरपौरुतेयत्वेन स्मृतेस्तन्मूलत्वेनानाशंकितदोषतया साक्षित्व (साक्षिवत्) प्रामाण्यसंभवात् । फलविसंवादस्य च स्वतस्त्वेन संवादानपेक्षणात् । फलविसंवादस्य च केषांचित्फलदर्शनेन क्वचिद्वैगुण्यनिमित्तत्वेनाप्युपपत्तेः । अपस्मृतिवैलक्षण्याच्च धर्मे प्रमाणमेव स्मृतिजातमिति सिद्धांतितं । नन्वस्तु तावद्भाष्य प्रामाण्यनिर्णीतिः आप्तोक्तत्वादिहेतुभिः । उक्ताप्तोक्तत्वादि हेतूनामशेष भाष्य साधारणतया व्याससूत्रतात्पर्य विषयीभूतार्थे अन्यतमभाष्यप्रामाण्य (ण्या) निर्णायकत्वात् । अनतिप्रसक्ततया प्रतीयमानेन सांख्यानुवादेनैवान्यतमभाष्य प्रामाण्यनिर्णयो वाच्यः । तेन च शांकरस्य निर्विशेषश्रुतिसूत्रयोजनस्यैव तत्तात्पर्यविषयीभूतार्थे प्रामाण्यमवसीयते । शंकरभाष्यस्यैव तत्तात्पर्य विषयीभूतार्थे सर्ववैदिकैः प्रामाण्यमभ्युपेयं । न तु भाष्यांतरस्येति चेत् । अत्रोच्यते । आनन्दतीर्थश्रीमच्चरणानां वायोस्तृतीयावतारत्वे श्रुतिपुराणादीनां मध्वतंत्रमुखभूषणादिषु श्रीमद्विजयींद्रतीर्थ श्रीमच्चरणैरुदहातत्वात् । तदवलोकिनां मध्वाचार्याणां वायोस्तृतीयावताररूपत्वे अप्रामाण्यशंकानुदयात् । शंकराचार्याणां शिवावताररूपत्वे श्रुतिपुराणादीनामनुपलंभेनाभावात् । चतुर्भिः सहितः शिष्यैः शंकरोऽवतरिष्यती त्यादेः स्वकल्पितत्वेना प्रमाणत्वात् । शैव लैंङ्ग्यादिपुराण शिवनामसहस्रसूत्रसंहिता शिवात्रिमाहात्म्यादिषु यत्रकुत्रचिच्छंकराचार्याणां शिवावतारत्वप्रतिपादनेऽपि तेषां तामसत्वेनानादरणीयत्वात् । मध्वाचार्याणां वाय्ववताररूपत्वैन परमाप्तत्वात् । आप्तमूलत्वेनानन्दतीर्थीयभाष्यस्यैव व्याससूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्यं नतु भाष्यांतरस्येति सिद्धम् । यदुक्तं तटस्थानुवादविषयत्वेन शंकरभाष्यस्येव प्रामाण्यमंगीकर्तव्यमिति तदयुक्तं । तटस्थस्य भ्रांतत्वात् । ब्रह्ममीमांसाशास्त्रे जीवेश्वरभेदप्रतिपादकानां इतरव्यपदेशात्, भेदव्यपदेशात् , रूपोपन्यासाच्चेत्यादिसूत्राणां बहूनां सद्भावेऽपि तद्भेदानुवादेन अभेदमात्रस्यैव व्याससूत्रतात्पर्यविषयत्वेनानुवादकेन कल्पितस्य भ्रांतत्वसंभवात् । तथा च प्रकृतेऽपि भ्रांतकपिलतंत्रानुवादविषयत्वेन

शंकराचार्याणामपि भ्रांतत्वं स्यादिति न शंकरभास्यस्य व्यासमूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्यसिद्धिरिति । ननु ब्रह्ममीमांसाशास्त्रे भेदप्रतिपादकसूत्रसद्भाववत् अविभागो वचनात् , आत्मेतितूपगच्छंति ग्राहयंति चे त्याद्यभेदप्रातिपादकसूत्रसद्भावप्रत्यभिज्ञानेन चाभेद एव व्याससूत्रतात्पर्यविषयोऽर्थः तदर्थानुवादकतया कापिलसूत्रकारस्याभ्रांतत्वेन तदनुवादविषयीभूताभेदप्रतिपादकत्वेन शंकरभाष्यस्यैव व्याससूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्यं न भाष्यांतरस्येति चेन्न । तथासति जीवब्रह्मणोः स्वाभाविक एव भेदोऽभेदश्चेति तदर्थप्रतिपादक यादवप्रकाशीयभाष्यस्यैव व्याससूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्यं न भाष्यांतरस्येत्येव वक्तुं शक्ये कुतस्तटस्थानुवादविषयकत्वेन शंकरभाष्यस्यैव व्याससूत्रतात्पर्याविषयत्वेन शंकरभाष्यस्यैव तात्पर्यविषयीभूतेऽर्थे प्रामाण्यं न भाष्यांतरस्येत्येतदनुपपन्नमिति । नन्वभेदप्रतिपादकत्वसाम्येन शंकरभाष्यस्य च प्राथम्येन च तटस्थानुवादविषयत्वेन व्याससूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्ये तदेकदेशभूतभास्करभाष्ययादवप्रकाशभाष्ययोर्द्वयोरपि तटस्थानुवादविषयकत्वेन व्याससूत्रतात्पर्यविषयीभूतेऽर्थे त्रयाणामपि भाष्याणां प्रामाण्यं सिध्यति न तु भाष्यांतरस्येति चेत्तर्हि भट्टभास्करभाष्ये जीवब्रह्मणोरभेदः स्वाभाविकः पारमार्थिकश्च । भेदस्त्वौपाधिकः पारमार्थिकश्चेति । यादवप्रकाशभाष्ये च तयोः स्वाभाविक एव भेदोऽभेदश्चेति शंकरभाष्यविरुद्धार्थभूत भेदौपाधिकपारमार्थिकत्वस्य यादवप्रकाशीयभाष्ये च जीवब्रह्मणोः स्वाभाविकभेदस्य च प्रतिपादनेन शंकरभाष्यसाम्यसंभवात् । यत्किंचित्साम्येन साम्यस्य च सर्वभाष्यसाधारण्यात् । किंच ब्रह्ममीमांसाशास्त्रे जीवेश्वरयोर्भेदाभेदप्रतिपादक सूत्राणां मानत्वेन यादवप्रकाशीयभाष्यस्यैव व्याससूत्रतात्पर्यविषयीभूतेऽर्थे प्रामाण्यमंगीकर्तव्यं न पुनर्भाष्यांतरस्येति । किंवा रामानुजीयादिभाष्यांतराणामपि जीवाभेदं पूर्वपक्षीकृत्य जीवेश्वरभेदं सिद्धांतीकृत्य प्रवृत्त(त्तत्वे)न भाष्यांतराणामपि व्याससूत्रतात्पर्याविषयीभूतार्थे समुच्चित्यप्रामाण्यापत्तेश्चेति । ततश्च पूर्वोक्तदोषस्तदवस्थ एवेति । किंच मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मण-

रूपिणेति पाद्मवचनेन । किंच गीतायां षोडशेऽध्याये 'द्वौभूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । अपरस्परसंभूतं किमन्यत्कामहेतुकं । एतां दृष्टि मवष्टभ्य नष्टात्मानोऽल्पवुद्धयः । प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः । इत्यादि वचनजातेन च शांकरादि भाष्यस्यासुर भाष्यत्वात् । न च चतुर्भिः सहितः शिष्यैः शंकरोऽवतरिष्यती त्यादिवचनाच्छंकराचार्याणां शिवाबतारत्वेन तत्कर्तृकभाष्यस्य नाऽसुरभाष्यत्वमिति वाच्यं । तद्वचनस्य स्वकल्पितत्वेनाप्रामाण्यात् । मध्वाचार्याणां वाय्ववतारत्वे मध्वतंत्रमुखभूषणादिषु श्रुतिपुराणादेरुदाहृतत्वात् । शंकराचार्याणां शिवावतारत्वे तथाभूतप्रमाणादेरभावात् । तथा चानन्दतीर्थीय भाष्यमेव व्याससूत्रतात्पर्य विषयीभूतार्थे प्रमाणमेवेति सिद्धम् ।

इति श्रीमच्छ्रीनिवासाचार्यवर्यकृत नव्यदुरुक्तिशिक्षा संपूर्णा ।।

श्रीकृष्णार्पणमस्तु ।।

श्रीधीरेंद्रयतिविरचितः विषयवाक्यसंग्रहः

|| श्रीगुरुराजो विजयते ||

|| श्रीधीरेंद्रयतिविरचितः विषयवाक्यसंग्रहः प्रारभ्यते ||

|| श्रीरामचन्द्रो विजयतेतराम् । श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्ण-
वेदव्यासात्मक लक्ष्मीहयवग्रीवाय नमः । हरिः ॐ ||

|| अथ प्रथमाध्याये प्रथमः पादः ||

श्रीमदानंदतीर्थार्यहृदयांभोजवासिनः ॥
श्रीरामकृष्णव्यासश्रीहयास्यान् प्रणमाम्यहम् ॥ १ ॥
श्रीमध्वतंत्रव्याख्याकृज्जयराजार्यपूर्वकान् ॥
श्रीराघवेंद्रवादींद्रवसुधेंद्रान्नतोऽस्म्यहम् ॥ २ ॥
श्रीव्यासो ब्रह्ममीमांसां चक्रे सूत्रगणात्मिकां ॥
सा चतुर्लक्षणी तत्र चत्वारः प्रतिलक्षणं ॥ ३ ॥
पादाः प्रसिद्धाः द्वाविंशत्पधिकद्विशतं नयाः ॥
तत्र सर्वाधिकरणेषु भाष्यटीकास्फुटान्यपि ॥ ४ ॥
वक्ष्ये विषयवाक्यानि तदुक्त्या ज्ञापितान्यहं ॥
विजिज्ञासस्वेति वाक्यं जिज्ञासानयगं स्मृतं ॥ ५ ॥
जन्माधिकरणस्योक्तं तद्ब्रह्मेति तदुत्तरं ॥
यतो वेत्यादि तत्पूर्वं शास्त्रयोनिनयस्य च ॥ ६ ॥
समन्वयस्यौपनिषदः पुरुष इत्यादिकस्तथा ।
नावेदविच्चेति वाक्यद्वयं विषयदर्शकं ॥ ७ ॥
नामानि सर्वाणि यमाविशंतीत्यादिकं तथा ।
इहेक्षतिनये गम्यं टीकादौ विषयोक्तितः ॥ ८ ॥

अंतरात्माऽऽनंदमय इत्यानंदमये नये ।
उपलक्षणायानंदमयशब्द उदाहृतः ॥ ९ ॥
अंतःप्रविष्टं कर्तारंमित्यंतःस्थनयस्य तु
आकाश इति होवाचेत्याकाशाख्यनयस्य तु ॥ १० ॥
तद्वै त्वं प्राणोऽभव इति प्राणनयस्य हि ॥
आद्य ज्योतिर्नयस्येदं ज्योतिरित्युदितं वचः ॥ ११ ॥
गायत्री वा इदं सर्वं गायत्र्यधिकृतेरपि ॥
चक्षुः श्रोत्रं मनः प्राण इति प्राणनयेंतिमे ॥ १२ ॥

इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे प्रथमाध्यायस्य प्रथमः पादः ॥

|| द्वितीयः पादः ||

सर्वभूतेष्वेतमिति (वाक्) सर्वत्रप्रसिद्धके ॥
सर्वं वा अत्तीति वाक्यमत्ताधिकरणस्य तु ॥ १ ॥
ऋतं पिबंतावित्याद्यं गुहाधिकरणीयकं ॥
य एषोंतरक्षिणीति त्वंतर्नयगतं वचः ॥ २ ॥
एष त आत्मांतर्यामीत्यंतर्यामिनयस्य हि ॥
अदृश्यत्वनये यत्तदद्रेश्यमिति भाषितं ॥ ३ ॥
यस्त्वेतमेव प्रादेशमात्रमित्यादिकं वचः ॥
वैश्वानरनयस्यै तद्विषय प्रतिपादकं ॥ ४ ॥

इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे प्रथमाध्यायस्य द्वितीयः पादः ॥

|| अथ तृतीयः पादः ||

यस्मिन् द्यौः पृथिवीत्येतद् द्युभ्वाद्यायतने नये ॥
यो वै भूमेति यद्वाक्यं भूमाधिकरणस्य तु ॥ १ ॥

एतद्वैतदक्षरं गार्गीत्यंतरनयस्य च ॥
सदेव सौम्येति यद्वाक्वं सन्नये विषयार्पकं ॥ २ ॥
दहरं पुण्डरीकं वैश्मेत्याद्यं दहरे नये ॥
तदेतादिति मन्यंत इत्याद्यनुकृतौ नये ॥ ३ ॥
अंगुष्ठमात्रमित्यादि शब्दादेवेति सन्नये ॥
विश्वे देवा इति वचो देवतानयगं मतं ॥ ४ ॥
पठेद्वेदानिति वचो ह्यपि शूद्रनये मतं ॥
महद्भयं वज्रमिति वाक्यं कम्पनसन्नये ॥ ५ ॥
प्राणे ह्यंतरिति ज्योतिर्दर्शनके नये ॥
आकाशोऽर्थांतरत्वादिह्याकाशे च प्रसिद्धवाक् ॥ ६ ॥
स यत्तत्रे त्यादि वाक्यमसंगत्वनयस्य हि ॥
महिमा ब्राह्मणस्येति वचः पत्यादिशब्दके ॥ ७ ॥

इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे प्रथमाध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

महतः परमव्यक्तमिति वागानुमानिके ॥
वसंते ज्योतिषेत्यादिनये ज्योतिरुपक्रमे ॥ १ ॥
संख्योपसंग्रहनये पंच पंचजना इति ॥
आकाशाद्वायुरित्येतत्कार्यकारणसन्नये ॥ २ ॥
सर्वे वेदा इति वचो समाकर्ष नयस्य तु ॥
सैषा प्रकृतिरित्याद्यं वाक्यं तु प्रकृतौ नये ॥ ३ ॥
एतेन सर्वे व्याख्याता इत्यध्यायांतिमे नये ॥
असदेवेति तुच्छेनेत्याद्यं विषयदर्शकं ॥ ४ ॥

इति श्रीधीरेंद्रयतिकृते विपयवाक्यसंग्रहे प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ प्रथमाध्यायः समाप्तः ॥

॥ अथ द्वितीयोऽध्यायः ॥

प्रथमः पादः

यतो वा स हि सर्वस्य कर्तेत्यादि स्मृतेर्नये ॥
सर्वे वेदा इति वचो नविलक्षणता नये ॥ १ ॥
मृदब्रवीदाप इती त्यभिमानिनये वचः ॥
यतो वा असदेवेदमित्याद्यं चाप्यसन्नये ॥ २ ॥
स हि सर्वस्य कर्तेति भोक्त्रापत्तिनयस्य तु ॥
स इदं सर्व मसृजतं त्यारंभणके नथे ॥ ३ ॥
यतो वे स्युक्तमितरव्यपदेशनयस्य च ॥
श्रुतेस्तु शब्दमूलत्वादित्यत्रापि तदेव हि ॥ ४ ॥
प्रयोजनाधिकरणे वैषम्यादिनये च तत् ॥
गुणाः श्रुता इति वचः सर्वधर्मोपपत्तिके ॥ ५ ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे द्वितीयाध्यायस्य प्रथमः पादः ॥

द्वितीयः पादः

स हि सर्वस्य कर्तेति नये सांख्ये त्वनीश्वरे ॥
एको वशी यतो वेति सेश्वरे सांख्यके नये ॥ १ ॥
यतो वेत्यदिकं लोकायतिकादि नयत्रये ॥
गुणाः श्रुतानंतगुणाः इति वैशेषिके नये ॥ २ ॥
अणुपुंजवादादिष्वापादांतनयेष्वपि ॥
यतो वे त्यादि कर्तृत्वबोधकं विषयार्पकं ॥ ३ ॥

इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे द्वितीयाध्यायस्य द्वितायः पादः ॥

तृतीयः पादः

वियन्नयस्य चाकाशः संभूत इति तद्वचः ॥
आकाशाद्वायुरित्येतन्मातरिश्वनये स्फुटं ॥ १ ॥

असंभवस्त्विति नये तद्ब्रह्मेत्युक्तमत्र च ॥
तेजोऽत इत्यधिकृते वायोरग्निरितीरितं ॥ २ ॥
अग्नेराप इति ह्येतत् आप इत्युदिते नये ॥
पृथिव्यधिकाररूप नयेऽद्भिः(द्भ्यः) पृथिवीति च ॥ ३ ॥
यत्प्रयंती त्यादिवाक्यं तदभिध्यानके नये ॥
विपर्ययेणेति नये भूतानीति क्रमादिति ॥ ४ ॥
तद्यच्छेद्ज्ञान इत्याद्य मंतरे त्यादिके नये ॥
नाऽऽत्मा श्रुतेरिति नये नित्यानां नित्यतावचः ॥ ५ ॥
सर्वे एते चिदात्मानः इति ज्ञोऽत नये वचः ॥
वागणुर्ह्येष आत्मेति ह्युत्क्रांत्यादिनयस्य तु ॥ ६ ॥
स पंचधेत्यादि वाक्यं व्यतिरेकनयस्य हि ॥
द्वा सुपर्णेत्यादिवाक्यं पृथगुपदेशाह्वये नये ॥ ७ ॥
यावदात्मे त्यधिकृतौ स नित्य इति तद्वचः ॥
विज्ञानात्मेति पुंस्त्वादिव त्त्वस्येति नयस्य हि ॥ ८ ॥
यत्कर्म कुरुते त्यादि जीवकर्तृत्व सन्नये ॥
वस्तुतो ज्ञोतएवे त्याद्यापादांतनयेऽपि सः ॥ ९ ॥

॥ इति श्रीधीरेंद्रयति कृते विषयवाक्यसंग्रहे द्वितीयाध्यायस्य तृतीयः पादः ॥

चतुर्थः पादः

स इदं सर्वमि त्याद्यं तथा प्राणा इतीरिते ॥
सर्वेंद्रियाणी तिचः नये तत्प्राक्श्रुतं रिति ॥ १ ॥
वागुत्पत्ति नये प्राणसंख्या व्याप्तिनये च तत् ॥
स प्राणमात्मत इति श्रेष्ठश्चेति नयस्य तत् ॥ २ ॥
चक्षुरादिवदि त्यत्र प्राणः परवशेति वाक् ॥
प्राणो वावे त्यादिवाक्यं पंचवृत्त्याह्वये नये ॥ ३ ॥

अणुश्चेति नये वाक्ये प्राचीन प्राण वाचकं ॥
तानीहवेति वा ज्योतिराद्यधिष्ठानके नये ॥ ४ ॥
त इंद्रियाणीति नये प्राणो वेत्यादिकं वचः ॥
संज्ञामूर्तेः क्लृप्ति नये नामरूपादि सृष्टि वाक् ॥ ५ ॥
मांसादि भौममित्यत्र तासां त्रिवृतमित्यदः ॥
टीकायां विषयवाक्यानि संगृहीतानि तानि वै ॥ ६ ॥

॥ इति श्रीधीरेंद्रयति कृते विषयवाक्य संगृहे द्वितीयाध्यायस्य चतुर्थः पादः ॥

॥ अथ तृतीयाध्यायः ॥

प्रथमः पादः

ब्राह्मणो निर्वेदमिति तदंतर नयस्य हि ॥
त्र्यात्मकत्वादिति नये वेत्थैवेति च वाग्द्वयं ॥ १ ॥
यद्वा तदंतरनये वैराग्यादि प्रसाधनं (!) प्रबोधकं ॥
त्र्यात्मकत्वाप्राणगतेरिति वेत्थेति वाग्द्वयं ॥ २ ॥
अग्निं वागप्येति वातमि त्यग्न्यादिगति श्रुतेः ॥
प्रथमे श्रवणं वेत्थेत्यश्रुतत्वादिके च तत् ॥ ३ ॥
भाक्तं वेत्यत्र बैराग्यपूर्वसाधनबाधकं ॥
कृतात्ययनये भूतैर्गच्छती त्यादि वाङ्मतम् ॥ ४ ॥
यथा तमेव पुनर्गच्छ त्यागच्छतीति च ॥
चरणादित्यत्र तथानिष्टादि कारिणामपि ॥ ५ ॥
संयमने त्यपि सप्तत्या तत्रापी त्यनमोर्मतं ॥
अथैतयोः पथोर्नैकेति विद्याकर्मणोर्नये ॥ ६ ॥
न तृतीये तथेत्यत्र यातयाम इतीत्यपि ॥
भूत्वेत्यादिकं तत्स्वाभाव्यापत्तिके नये ॥ ७ ॥
नाति चिरेणेति तत्र ततः शेषेण चेति वाक् ॥
अन्याधिष्ठित इत्यस्मिन्निति व्रीहियवा इति ॥ ८ ॥

तद्य इह शुभकृतः रेतः सिग्येगिके त्विति ॥
योनेः शरीरमित्यत्र सृतियोग्य इतीरितं ॥ ९ ॥

इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे तृतीयाध्यायस्य प्रथमः पादः ॥

द्वितीयः पादः

स्वप्नायै वे त्यादि संध्ये सृष्टिराह नये मतं ॥
वेदनंतरमित्याद्यं पराभिध्यानके नये ॥ १ ॥
जागरितस्थान इति देहयोगादितीरिते ॥
नाडीषु सुप्त इत्याद्या तदभाव इतीरिते ॥ २ ॥
अतः प्रबोध इत्यस्मिन् यदा जीवः प्रबुध्यते ॥
स एवत्रेत्यधिकृतौ स स्वप्न इति वा मतं ॥ ३ ॥
मुग्धेऽर्धसम्पत्तिनये मोहादिप्रातिपादके ॥
दक्षिणानि मुखेत्यादि मतं न स्थानतो नये ॥ ४ ॥
अरूपयन्नरा रुग्मवर्णं चानंतमात्रकं ॥
अतएवचोपमेत्यादावंबुवदग्रहणे नये ॥ ५ ॥
वृध्दिह्रासादिका चैव यस्य देवेति भक्तिवाक् ॥
यउत्रिधात्विति भचः प्रकृतैतावतानये ॥ ६ ॥
भक्तिरेवैनमाभियाति तदव्यक्तनये तथा ॥
उभयव्यपदेशाख्ये यस्य देवेति वा वचः ॥ ७ ॥
परमतस्सेत्वित्यत्र सत्यज्ञानादिवाचकं ॥
एतस्य ब्रह्मण इति स्थानवैशेष्यके नये ॥ ८ ॥
तथाऽन्यत्प्रतिषेधाख्ये ब्रह्मोपास्स्वे ति वाङ्मतं ॥
स इदं सर्वमसृजतेत्यनेनेति सन्नये ॥ ९ ॥
एषह्येवेत्यादि फलमत इत्यादिके नये ॥

॥ इति श्रीधीरेंद्रयातिकृते विषयवाक्यसंग्रहे तृतीयाध्यायस्य द्वितीयः पादः ॥

अथतृतीयः पादः

सर्ववेदांताधिकृतौ सर्वे वेदा इतीरितं ॥
सर्वैश्च वेदैरित्याद्यामुपसंहारके नये ॥ १ ॥
सर्वैर्गुणैरेक आत्मेत्येवेति च द्वयं (मतं) ॥
प्राप्तेश्चेति नये चायं सर्वाभेदनये तथा ॥ २ ॥
आनन्दादय इत्यत्र सत्यज्ञानादि वाचकं ॥
नये प्रियशिरस्त्वाख्ये एतस्य प्रमितीरितं ॥ ३ ॥
अन्येषु तु यथायोगं इतरेत्त्वर्थसाम्यके ॥
सर्वैरितिप्रागुदिते त्वाध्यानायेति सन्नये ॥ ४ ॥
विज्ञानमानंदमिति गुणास्त्वात्मगृहीतिके ॥
आत्मेत्येवेत्युक्तवाक्यमन्वयादिति सन्नये ॥ ५ ॥
एष नित्यो महिमेति कार्याख्यानादपूर्वके ॥
समानएववेत्यत्र लौकिकेत्यादिकं मतं ॥ ६ ॥
नवा विशेषादित्यत्र चात्मेत्येवेति वाग्भवेत् ॥
संभृतिद्युव्यामिरेव सर्वे पुक्षार इत्यपि ॥ ७ ॥
पुरुषविद्यायामानेऽपीत्यत्र सर्वैर्गुणैरिति ॥
अग्ने त्वचं विध्य ममनिति वेधादिके मतं ॥ ८ ॥
हानौ तूपायनेत्यत्रोपासनादिविधायकं ॥
तमेवं विद्वानमृतः छंदतोभयसन्नये ॥ ९ ॥
पूर्वोक्तमेवानियमः सर्वेषामिति चोदिते ॥
तं तथोपासते यावदधिकारमवस्थितैः ॥ १० ॥
नासप्राणाद्यंतवाक्यमियदामननादिति ॥
व्यतिहारनये विष्णोः यं सत्यैवेतिवादिनी ॥ ११ ॥
सत्यादयः सवै हीति प्राणो वावेति वाङ्नये ॥
महतोऽयक्तमित्याद्यं कामादित्यादिके नये ॥ १२ ॥

श्रोतव्यमित्याद्यखिलं तन्निर्धारणपूर्वके ॥
प्रदानवदिति ह्यत्र तदैव विषयार्पकं ॥ १३ ॥
लिंगभूयस्त्वतस्तद्धीत्यत्र चाचार्यवानिति ॥
आचार्याद्धियुक्तमेतत्पूर्वैवैकल्पिके नये ॥ १४ ॥
ब्रह्मोपास्वेत्यादि वाक्यं विद्यैवत्विति सन्नये ॥
श्रुत्यादिबलवत्त्वाचेत्यादावमृतमित्यदः ॥ १५ ॥
अनुबंधादिभ्य इति दृश्यतेत्यादिकं वचः ॥
प्रज्ञांतरपृथक्त्वेति ब्रह्मोपासाविधायकं ॥ १६ ॥
न सामान्यादपीत्यत्र दृष्टैवेत्यादि दृष्टिवाक् ॥
परेण शब्दस्येत्यत्र भक्त्या दर्शन वाक्मतं ॥ १७ ॥
व्यतिरेकस्तद्भावेत्यत्रोपास्त्यादिविधायकं ॥
अंगावबद्धास्तित्यत्रात एवात्मानमेव च ॥ १८ ॥
भूम्नः क्रतुवदित्यत्र यो वैभूमेति विश्रुतं ॥
तदेव नानाशब्दादिभेदादित्यत्र चोदितं ॥ १९ ॥
विकल्प इत्यधिकृतौ नृसिंहादेरुपास्तिवाक् ॥
आवर्हंतीत्यादिवाक्यं काम्यास्त्विति नये मतं ॥ २० ॥
ब्रह्मा शिरसि चेत्याद्यमगेष्वित्यत्र संमतं ॥
नत्रेत्यत्र तदेव स्यात् टीकादौ विषयोक्तितः ॥ २१ ॥
भावदीपे न्यायमुक्तावल्यादौ च तथोक्तितः ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे तृतीयाध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

तमेवमित्यादिवाक्यं पुरुषार्थनयस्य हि ॥
तदेवासार्वत्रकीति ज्ञानादेवेतिवाग्भवेत् ॥ १ ॥

नाविशेषादिति पठेद्वेदानर्थानितीरितं ॥
स्तुतयेऽनुमतिर्वेति स ब्राह्मण इति स्फुटं ॥ २ ॥
सर्वथाऽपि तु त एवेत्यस्य तमेतं दृश्यतेतिच ॥
न चाधिकारिकमिति वेदेहीत्यादिकं वचः ॥ ३ ॥
ब्रह्मविदाप्नोतिपरमित्याद्यं स्वामिनः फले ॥
कृत्स्नभावाधिकरणे कुटुंबीत्यादिकं वचः ॥ ४ ॥
एतां मनुष्येष्वित्याद्यमनाविष्कृणके नये ॥
नये त्वैहिकामित्यादावात्मा वारेति दृष्टिवाक् ॥ ५ ॥
एवं मुक्तिफलेच्छेत्यत्र ब्रह्मसंस्थामयं त्विति ॥
उद्धृतान्येव वाक्यानि टीकायां विषयोक्तितः ॥ ६ ॥

॥ इति श्रीधीरेंद्रयति कृते विषयवाक्यसंग्रहे तृतीयाध्यायस्य चतुर्थः पादः ॥

॥ तृतीयाध्यायः समाप्तः ॥

॥ अथ चतुर्थोऽध्यायः ॥

प्रथमः पादः

श्रोतव्य इत्यादिवाक्यमावृत्तेरसकृन्नये ॥
आत्मानमेवेति वचः आत्मेतित्विति सन्नये ॥ १ ॥
न प्रतीके नही त्यत्र नाम ब्रह्मेति च स्मृतं ॥
ब्रह्मदृष्टिनये ब्रह्म पूर्णमित्यादिकं वचः ॥ २ ॥
चक्षोः सूर्योऽजायतेति ह्यादित्यादि मते नये ॥
उपविश्यासने त्याद्यमासीनः संभवादिति ॥ ३ ॥
सर्वदैनमुपासीते त्यादि प्राणनयेऽपि हि ॥
विद्वानतिमृत्युमेतीत्याद्यं कर्मक्षये नये ॥ ४ ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे चतुर्थाध्यायस्य प्रथमः पादः ॥

द्वितीयः पादः

वाङ्मनासि दर्शनादित्यत्र वाङ्मनसीति वाक् ॥
तन्मनः प्राण इत्यत्र मनः प्राणेति वाङ्मतं ॥ १ ॥
प्राणः परमन्वित्येतत्सोध्यक्षे तदितीर्यते ॥
भूतेष्वित्यत्र वागग्नौ सर्वे देवा इतीरितं ॥ २ ॥
सर्वे देवा इति वचो नैकस्मिन्निति सन्नये ॥
महतोऽव्ययमित्याद्यं समनेत्यादिके नये ॥ ३ ॥
अविभाग नये सत्यकाम इत्यादिकं मतं ॥
शतंचैकाचेति वाक्यं नदोकोग्रादिके नये ॥ ४ ॥
योगिनः प्रतिस्मर्येतेत्याद्येऽसौ विषयस्त्विति ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

अर्चिरादिनये चैव तेऽर्चिषंत्विति वाग्मवेत् ॥
वायुशब्दादिति नये स वायुमिति निश्चयः ॥ १ ॥
तडितोऽधीत्यधिकृतेर्वत्सरात्तडितं त्विति ॥
द्वितीयां गतिं वायुमित्याद्यातिवाहिकलैंगिके ॥ २ ॥
कार्यं बादरिरित्यत्र सएनानिति चोदितं ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे चतुर्थाध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

सम्पद्येत्यत्र चात्मानमभिसम्पद्यतेत्यदः ॥
स तत्र पर्येतीत्येतन्मुक्तमित्यादिके नये ॥ १ ॥
परंज्योतिरुपेत्यैतदात्मप्रकरणादिके नये ॥
अविभागेनेति नये सर्वान् कामानितीरितं ॥ २ ॥

ब्राह्मेण जैमिनिनये तानेवैतद्ददंत्विति ॥
संकल्पादेव चेत्यत्राथसदैवमितीरितं ॥ ३ ॥
अत एव चानन्यनये विमुक्तश्चेति मुक्तिवाक् ॥
अभावं बादरिरिति नये कामानितीरितं ॥ ४ ॥
सर्वान् कामानवाप्नेति जगद्व्यापारवर्जने ॥
स्थितिमाहेत्यत्रचैनत्साम गायन्नितीरितं ॥ ५ ॥
अनावृत्तिनये पूर्वं विमुक्तिप्रतिपादकं ॥
टीकादौ विषयोक्तानि अन्विष्टानि यथामति ॥ ६ ॥

॥ इति श्रीधीरेंद्रयतिकृते विषयवाक्यसंग्रहे तुरीयाध्यायस्य तुरीयः पादः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ समाप्तोऽयं ग्रंथः ॥

समन्वयाध्याये नामपादः १ लिंग पादः २ लोकतोऽन्यत्र च उभयत्र प्रसिद्धनामलिंग पादः ३ श्रुतिलिंगादिबलादन्यत्र प्रसिद्ध नामलिंग पादः ४ ॥ **अविरोधाध्याये** ॥ युक्तिपादः १ समय पादः २ श्रुति पादः ३ न्यायोपेत श्रुति पादः ४ ॥ **साधनाध्याये** ॥ वैराग्य पादः १ भक्तिपादः २ उपासना पादः ३ ज्ञान पादः ४ ॥ **फलाध्याये** ॥ कर्मक्षयपादः १ उत्क्रांति पादः २ मार्गगम्य पादः ३ भोग पादः ४ ॥

॥ श्री कृष्णार्पणमस्तु ॥

श्रीमत्पंचमुखहनुमद्ध्वजक येरगेरि पण्डित
श्री पंचमुखी वेंकटाचार्य कृत अधिकरणरत्नमाला

|| श्रीमन्मूलरामो विजयते ||

|| श्रीमत्पंचमुख प्राणेशायनमः ||

|| श्रीमत्पंचवक्त्रहनुमद्भजक येरगेरि पंचमुखी वेंकटाचार्यकृत अधिकरणरत्नमाला ||

|| श्रीगुरुभ्यो नमः || हरिः ॐ ||

गुणवरुणालयमीश्वरं मुदे गुणिकरूणालयमीप्सितदेष्टतरुं ।।
भवजलराशिदरतिहेतव भवनकरासिदमादरतस्तु भजे ।। १ ।।

आम्नायतूलाद्विरचय्य सूत्राण्यलंकृतानीशधियाऽध्यगुंफीत् ।।
स्वरूपरत्नाकर जातसन्नय स्वरूपरत्नेषु स मेऽस्तु भूत्यै ।। २ ।।

श्रीसीतापति पादपद्म विलसल्लोलंबचेतास्सदालंबस्तंभितकर्बुरेंद्रतनयः
प्लुष्टारिपूरिष्टभाक् ।।
नानावानरवीरदोर्बलसमानीतागबद्धोदधि–
स्सद्यः श्रीगुरुचित्तपद्मसविता दद्याद्धियं मारुतिः ।। ३ ।।

भाष्यकारं भाष्यवोधासिध्यै बोधनिधिं मुदे ।।
भारतीशं व्यासदासं विदूरसमहं भजे ।। ४ ।।

श्रीनिवासालवालोरुरूढं श्रीलतयैधितं ।।
श्रीनिवासकरं ध्याये चित्स्वर्द्रुं रंगवेंकटं ।। ५ ।।

कुवाद्युद्बद्धटानां यो विपाटनहटी पटुः ।।
रंगवेंकटसिंहं तमाश्रये धीरतामये ।। ६ ।।

यरगेरिपदग्रामवासी वेंकटपण्डितः ।।
